# લિંગાષ્ટકમ્

બ્રહ્મમુરારિસુરાર્ચિતલિંગમ્
નિર્મલભાષિતશોભિતલિંગમ્ ।
જન્મજદુઃખવિનાશકલિંગમ્
તત્પ્રણમામિ સદાશિવલિન્ગમ્ ॥ ૧ ॥

દેવમુનિપ્રવરાર્ચિતલિંગમ્
કામદહમ્ કરુણાકરલિંગમ્ ।
રાવણદર્પવિનાશનલિંગમ્
તત્પ્રણમામિ સદાશિવલિન્ગમ્ ॥ ૨ ॥

સર્વસુગન્ધિસુલેપિતલિંગમ્
બુદ્ધિવિવર્ધનકારણલિંગમ્ ।
સિદ્ધસુરાસુરવન્દિતલિંગમ્
તત્પ્રણમામિ સદાશિવલિન્ગમ્ ॥ ૩ ॥

કનકમહામણિભૂષિતલિંગમ્
ફણિપતિવેષ્ટિતશોભિતલિંગમ્ ।
દક્ષસુયજ્ઞવિનાશનલિંગમ્
તત્પ્રણમામિ સદાશિવલિન્ગમ્ ॥ ૪ ॥

કુમકુમચંન્દનલેપિતલિંગમ્
પંન્કજહારસુશોભિતલિંગમ્ ।
સન્ચિતપાપવિનાશનલિંગમ્
તત્પ્રણમામિ સદાશિવલિન્ગમ્ ॥ ૫ ॥

દેવગણાર્ચિતસેવિતલિંગમ્
ભાવૈર્ભક્તિભિરેવ ચ લિંગમ્
દિનકરકોટિપ્રભાકરલિંગમ્
તત્પ્રણમામિ સદાશિવલિન્ગમ્ ॥ ૬ ॥

અષ્ટદલોપરિવેષ્ટિતલિંગમ્
સર્વસમુદ્ભવકારણલિંગમ્ ।
અષ્ટદરિદ્રવિનાશનલિંગમ્
તત્પ્રણમામિ સદાશિવલિન્ગમ્ ॥ ૭ ॥

સુરગુરુસુરવરપૂજિતલિંગમ્
સુરવનપુષ્પસદાર્ચિતલિંગમ્ ।
પરાત્પરમ્ પરમાત્મકલિંગમ્
તત્પ્રણમામિ સદાશિવલિન્ગમ્ ॥ ૮ ॥

લિંગાષ્ટકમિદમ્ પુણ્યમ્ યઃ પઠેચ્છિવસન્નિધૌ ।
શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ॥

***********